**CLASS : 12th (Sr. Secondary)** # **Code No. 5767**

**Series : S.S.-March/2022**

*Roll No.* | | | | | | | | | | |

# उत्तर मध्यमा (द्वितीय वर्ष) संस्कृत साहित्य वेद सिद्धान्त (आधुनिक आर्ष पद्धति)

**Sub Code : 1204/SSA**

(Only for Fresh/Re-appear Candidates)

*समय : **$2\frac{1}{2}$** घण्टे]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **6** हैं।*
- *प्रश्न-पत्र में सबसे ऊपर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/ पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देशः*** (i) *सर्वे प्रश्नाः अनिवार्याः सन्ति।*

(ii) *उत्तरपुस्तिकायां प्रश्नसंख्या अवश्यमेव लेखनीया।*

(iii) *सुस्पष्ट लेखने ध्यानं दातव्यम्।*

**1.** निम्नलिखितश्लोकानां ***चतुर्णां*** सप्रसङ्गव्याख्या कार्या - $4 \times 5 = 20$

(क) अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः।।

(ख) यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः।।

(ग) सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम्।।

(घ) आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते।।

**2.** निम्नाङ्कितेषु श्लोकेषु कयोश्चिद् द्वयोः व्याख्या कार्या - $3 \times 2 = 6$

(क) यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण प्रवक्ष्ये।।

(ख) पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तः स्थानि भूतानि येन सर्वमिदं ततम्।।

(ग) यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ।।

**3.** अग्रलिखितगद्यांशेषु केषांचित् सप्तगद्यानां व्याख्या सप्रसङ्गं कार्या - $2 \times 7 = 14$

(i) सिंह-व्याघ्र-भल्लुक-गण्डक-फेरू-साहस्र-व्याप्तान्यरण्यानि जनपदीकरोति, मन्दिर-प्रासाद-हर्म्य-शृंगाटक-चत्वरोधानतडाग-गोष्ठमयानि नगराणि च काननीकरोति।

(ii) भगवान् ! दम्भोलिघटितेयं रसना, या दारुण-दानवोदन्तोदीरणैर्न दीर्य्यते, लौहसारमयं हृदयं यत् संस्मृत्य यवनान् परस्सहस्त्रान् दुराचारान् शतधा न भिद्यते।

(iii) ''वत्स गौरसिंह!'' अहमत्यन्तं तुष्यामि त्वयि, यत् त्वमेकाकी अफजलखानस्य त्रीनश्वान् तेन दासीकृतान्।

(iv) तदाकर्ण्य विविधभावभङ्ग भासुरवदनो योगिराजो मुनिराजं तत्सहचरांश्च निपुणं निरीक्ष्य, तेषामपि शिववीरान्तरंगतामङ्गीकृत्य मुनिवेषव्याजेन स्वधर्मरक्षाव्रतिनश्चोररीकृत्य विजयतां शिववीरः।

(v) बटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, सुबाहुर्विशाललोचनश्चासीत्।

(vi) ततः ''किमिति ? कुत इति ? केयमिति ? कथमिति ? पृच्छापरवशे योगिराजे ब्रह्मचारिगुरुणा बालिकां सान्त्वयितुं श्यामबटुमादिश्य कथितम्।

(vii) तां च चन्द्रकलयेव निर्मिताम्, नवनीतेनेव रचिताम्, मृणालगौरीम्, कुन्दकोरकाग्रदतीं सक्षोभं रुदतीमवलोक्याऽस्माभिरपि न पारितं निरोद्धुं, नयनवाष्पाणि।

(viii) इति पृष्टा मुग्धतया अपरिकलित वाक्पाटवा, भयेन विशिथिलवचनविन्यासा लज्जया, अतिमन्दस्वरा, शोकेन रुद्धकण्ठा चकितचकितेव कथं कथमपि अबोधयदस्मान्।

## (वस्तुनिष्ठप्रश्नाः)

**4.** निम्नलिखितप्रश्नानामुत्तराणि विकल्पेषु समुचित विकल्पानि चित्वा दातव्यानि - $10 \times 1 = 10$

(i) हनुमान-मन्दिरं कः पलायमानो गतः ?

(क) शहाबुद्दीनः (ख) शिवाजीमहोदयः

(ग) श्यामगौरसिंहौ (घ) रघुवीरसिंहः

(ii) रात्रौ तोरणदुर्गं प्रति कः आगतः ?

(क) श्यामसिंहः (ख) गौरसिंहः

(ग) शहाबुद्दीनः (घ) रघुवीरसिंहः

(iii) रघुवीरसिंहस्य मार्गः कीदृशः आसीत् ?

(क) जलपूरितः (ख) कण्टकावृत्तः

(ग) शिलाव्याप्तः (घ) पुष्पाच्छादितः

(iv) शिवराजविजयनको ग्रन्थः कस्यां शैल्यां लिखितम् ?

(क) गद्यशैल्यां (ख) पद्यशैल्यां

(ग) खण्डकाव्यशैल्यां (घ) चम्पूशैल्यां

(v) शिवराजविजये सूर्यस्य का संज्ञा आसीत् ?

(क) भानुमाली (ख) दिनकरमाली

(ग) दिवाकरमाली (घ) मरीचिमाली

(vi) गद्यकाव्यं कतिप्रकारकं भवति ?

(क) पञ्च (ख) चतुर्धा

(ग) अष्टौ (घ) सप्त

(vii) अम्बिकादत्तव्यासेन स्वग्रन्थे कस्य रसस्य प्रयोगः कृतः ?

(क) वीररसस्य (ख) शृङ्गाररसस्य

(ग) करुणरसस्य (घ) विप्रलम्भरसस्य

(viii) शिवराजराज्ञो वर्णनं कस्मिन् ग्रन्थे कृतं वर्तते ?

(क) शिवराजजये (ख) शिवराजवीरे

(ग) शिवराजक्षत्रीये (घ) शिवराजविजये

(ix) अम्बिकादत्तव्यासस्य पितुः नाम किमासीत् ?

(क) दुर्गादत्तः (ख) देवीदत्तः

(ग) रामदत्तः (घ) ब्रह्मदत्तः

(x) अम्बिकादत्तव्यासः कस्य ग्रन्थस्य रचनाकारो वर्तते ?

(क) 'अथ' इत्यस्य (ख) शिवराजविजयस्य

(ग) मेघदूतस्य (घ) हितोपदेशस्य

**5.** एकेन पदेन उत्तरं ददातु - 1 × 15 = 15

(i) गुर्जरप्रदेशे किं तीर्थम् आसीत् ?

(ii) दुर्गादत्तः कस्य पिता आसीत् ?

(iii) गजनवी कति वारं भारतवर्षमलुण्ठत् ?

(iv) अपहृतां बालिकां अन्वेष्टुं कः गतवान् ?

(v) युधिष्ठिरस्य काले कः प्रथमतया समाधिम् आकलितवान् ?

(vi) श्रीमद्भगवद्गीतायां कति श्लोकाः सन्ति ?

(vii) गजनीदेशस्य निवासी कः आसीत् ?

(viii) गीतामहाभारतस्य कस्मिन् पर्वणि अस्ति ?

(ix) 'रात्रिर्गमिष्यति भविष्यति सुप्रभातम्'' एषा पंक्तिः कुतः उद्धृता वर्तते ?

(x) श्रीमद्भगवद्गीताग्रन्थस्य अष्टम-अध्यायस्य नाम किम् ?

(xi) रघुवीरसिंहः कां दृष्ट्वा मोहितो बभूव ?

(xii) औरंगजेबः केन उपाधिना विभूषितः ?

(xiii) कन्दरायां कः समाधिस्थः आसीत् ?

(xiv) गीतायांकति पर्वाणि सन्ति ?

(xv) अष्टमे अध्याये कति श्लोकाः सन्ति ?

**6.** रिक्तस्थानानि समुचितोत्तरैः पूरयत - 1 × 15 = 15

(i) 1087 तमे वैक्रमाब्दे ............ प्राणानत्यजत् ?

(क) गजनवी (ख) शहाबुद्दीनः

(ग) शिववीरः (घ) अफजलखानः

(ii) अफजलखानः विजयपुराधीश्वरस्य ............ आसीत् ?

(क) मन्त्री (ख) सेनापतिः

(ग) सेवकः (घ) सेनानी

(iii) गौरसिंहः ............. आसीत् ?

(क) ब्राह्मणः (ख) पुजारी

(ग) दासः (घ) क्षत्रीयः

(iv) शास्तिखानः विजयपुरस्य ............. आसीत् ?

(क) राजा (ख) प्रजा

(ग) दासः (घ) सेनापतिः

(v) गायकरूपेण अफजलखानस्य समीपं ............ गतवान् ?

(क) गौरसिंहः (ख) बहादुरसिंहः

(ग) खड्गसिंहः (घ) वीरसिंहः

(vi) दास्यवः श्यामगौरसिंहयोः अपहरणं ............ काले कृत्वत्यः ?

(क) यौवनकाले (ख) वृद्धकाले

(ग) किशोरकाले (घ) बाल्यकाले

(vii) रघुवीरसिंहः .............. बालिकां दृष्ट्वामोहितो बभूव।

(क) नृत्यन्तीम् (ख) शयानाम्

(ग) गायन्तीम् (घ) क्रीडन्तीम्

(viii) 'माल्यश्रीः' शिववीरस्य .......... आसीत् ?

(क) रिपुः (ख) मित्रम्

(ग) स्वामी (घ) भृत्यः

(ix) शिवराजविजयस्य ग्रन्थस्य औरंगजेबः ........... आसीत् ?

(क) नायकः (ख) खलनायकः

(ग) लेखकः (घ) प्रतिसायकः

(x) कार्यं वा साधयेयम् देहो वा .............. ।

(क) रक्षेयम् (ख) पोषयेयम्

(ग) पातयेयम् (घ) स्वापयेयम्

(xi) द्वादशवारं ............ भारतवर्षमलुण्ठत् ?

(क) शहाबुद्दीनः (ख) गजनवी

(ग) कुतुबुद्दीनः (घ) औरंगजेबः

(xii) औरंगजेबः ............. उपाधिना विभूषितः आसीत् ?

(क) आलमगिरः (ख) शहंशाहः

(ग) नायकः (घ) राजपुत्रः

(xiii) श्यामगौरसिंहयोः पुरोहितस्य नाम आसीत् ?

(क) ब्रह्मशर्मा (ख) विष्णुशर्मा

(ग) देवशर्मा (घ) भद्रशर्मा

(xiv) शिववीरः राजद्रोहिणः रूपे ............ निष्कासनं करोति ?

(क) रघुवीरस्य (ख) चन्द्रवीरस्य

(ग) गौरसिंहस्य (घ) श्यामवीरस्य

(xv) समाधिस्थो मुनिः ............. आसीत् ?

(क) देवालये (ख) कन्दरायाम्

(ग) कानने (घ) राजगृहे